02/11/18 Morning

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

प्रश्न-पत्र पुस्तिका संख्या / Question Paper Booklet No. 3000805

**Subject Code : 08**

**विषय / SUBJECT : SANSKRIT**

# ST-81

# PAPER-II

**समय : 2.30 घण्टे**
**Time : 2.30 Hours**

**अधिकतम अंक : 300**
**Maximum Marks : 300**

**प्रश्न-पत्र पुस्तिका एवं उत्तर पत्रक के पेपर सील / पॉलिथीन बैग को खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न-पत्र पुस्तिका पर वही प्रश्न-पत्र पुस्तिका संख्या अंकित है जो उत्तर पत्रक पर अंकित है । इसमें कोई भिन्नता हो तो वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । ऐसा न करने पर जिम्मेदारी अभ्यर्थी की होगी ।**

**The candidate should ensure that Question Paper Booklet No. of the Question Paper Booklet and Answer Sheet must be same after opening the Paper Seal / Polythene bag. In case they are different, a candidate must obtain another Question Paper. Candidate himself shall be responsible for ensuring this.**

## परीक्षार्थियों के लिए निर्देश

1. **सभी** प्रश्नों के उत्तर दीजिए ।
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का केवल **एक** ही उत्तर दीजिए ।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले अथवा बबल को उत्तर पत्रक पर **नीले बॉल प्वाइंट पेन** से गहरा करना है ।
6. **OMR** उत्तर पत्र इस परीक्षा पुस्तिका के अन्दर रखा है । जब आपको परीक्षा पुस्तिका खोलने को कहा जाए, तो उत्तर पत्र निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है । किसी भी प्रश्न से संबंधित गोले या बबल को खाली छोड़ना गलत उत्तर नहीं माना जायेगा ।
8. मोबाइल फोन अथवा इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।
9. कृपया अपना रोल नम्बर ओ.एम.आर. पत्रक पर सावधानीपूर्वक सही भरें । गलत अथवा अपूर्ण रोल नम्बर भरने पर **5 अंक** कुल प्राप्तांकों में से काटे जा सकते हैं ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए विविध नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही विभाग ऐसे अभ्यर्थी को भविष्य में होने वाली विभाग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. Answer **all** questions.
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as **1, 2, 3, 4**. You have to darken only one circle or bubble indicating the correct answer on the Answer Sheet using **BLUE BALL POINT PEN**.
6. The **OMR** Answer Sheet is inside this Test Booklet. When you are directed to open the Test Booklet, take out the Answer Sheet and fill in the particulars carefully with **blue ball point pen** only.
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question. Leaving all the relevant circles or bubbles of any question blank will not be considered as wrong answer.
8. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
9. Please correctly fill your Roll Number in O.M.R. Sheet. **5 Marks** can be deducted for filling wrong or incomplete Roll Number.

***Warning :*** *If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted. Department may also debar him/her permanently from all future examinations.*

**इस परीक्षा पुस्तिका को तब तक न खोलें जब तक कहा न जाए ।**
**Do not open this Test Booklet until you are asked to do so.**

1. "अधिहरि" इति समस्त पदस्य लौकिकं विग्रहम् –

(1) हरौ इति (2) हरेः अनु

(3) हरयोः अधि (4) हरीणाम् इति

2. "उपकृष्णम्" इति समस्तपदे 'उप' इति अव्ययस्य समासः कस्मिन्नर्थे कृतः –

(1) विभक्त्यर्थे (2) समीपार्थे

(3) समृद्ध्यर्थे (4) अर्थाभावे

3. उत्तरपदार्थप्रधानः समासः केन नाम्ना प्रोक्तः ?

(1) बहुव्रीहिः (2) अव्ययीभावः

(3) तत्पुरुषः (4) द्विगुः

4. समानाधिकरणः तत्पुरुषः किं व्यपदिश्यते ?

(1) अव्ययीभावः (2) नञ्

(3) उपपदम् (4) कर्मधारयः

5. "पितरौ" इति समस्तपदस्य विग्रहः स्यात् –

(1) माता च पिता च (2) पितां च पितां च

(3) पित्रेण (4) पितरि

6. "कण्ठेकालः" कस्योदाहरणं स्यात् ?

(1) समानाधिकरणबहुव्रीहेः

(2) कर्मधारयस्य

(3) व्यधिकरणबहुव्रीहेः

(4) तत्पुरुषस्य

7. "पाणिपादम्" इति पदस्य लौकिको विग्रहः स्यात् –

(1) पाणि च पादम् च

(2) पाणी च पादौ च एषां समाहारः

(3) पाणिम् पादञ्च

(4) पाणिपादाः

8. "उदितः" इति शब्दे प्रकृति-प्रत्ययौ स्तः –

(1) उद् + क्त (2) वद् + क्त

(3) वच् + क्त (4) उद् + इत्

9. "गम् + शतृ" इति प्रत्यये कृते कृदन्तरूपं स्यात् –

(1) गच्छत् (2) गमत्

(3) गमन्त (4) गच्छवान्

10. "कृ + तुमुन्" इति प्रत्यये कृते कृदन्तरूपं स्यात् –

(1) कृतम् (2) कृतुम्

(3) कर्तुम् (4) कर्तुमुन्

11. "उपकृत्य" इति कृदन्तरूपे प्रकृतिप्रत्ययौ स्तः –

(1) उप + कृ + त्य (2) उप + कृ + क्तवतु

(3) उप + कृ + त (4) उप + कृ + ल्यप्

12. ल्युट् प्रत्यये इत्संज्ञकलोपे कृते 'यु' स्थाने किम् आदेशो भवति ?

(1) अन (2) ल्यु

(3) अक (4) अव

13. "दानीयः" इत्यत्र प्रत्ययोऽस्ति –

(1) इय्    (2) अनीयर्

(3) नीयम्    (4) अनम्

14. "कारकः" इत्यर्थे धातोः प्रत्ययः स्यात् –

(1) अक्    (2) अन्

(3) ण्वुल्    (4) वुन्

15. सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोः प्रत्ययः स्यात् –

(1) यत्    (2) क्त

(3) कञ्    (4) घञ्

16. "तदस्यास्त्यस्मिन्निति ..." इत्यर्थे प्रत्ययः स्यात् –

(1) मतुप्    (2) तमप्

(3) वतुप्    (4) अण्

17. ऋवर्णान्तात् हलन्तात् च धातोः कः प्रत्ययः स्यात् –

(1) यत्    (2) अञ्

(3) घञ्    (4) ण्यत्

18. "हरि" शब्दस्य षष्ठी बहुवचने रूपमस्ति –

(1) हरयोः    (2) हरिनाम्

(3) हरीणाम्    (4) हरीनाम्

19. 'सखि' शब्दस्य सप्तमी एकवचन–रूपमस्ति –

(1) सख्युः    (2) सख्यौ

(3) सखिन्    (4) सख्याम्

20. "गुरुषु" शब्दरूपमस्ति –

(1) षष्ठी एकवचनम्    (2) षष्ठी बहुवचनम्

(3) सप्तमी बहुवचनम्    (4) सप्तमी एकवचनम्

21. 'भूभृत्' शब्दस्य सप्तमी एकवचनरूपमस्ति –

(1) भूभृति    (2) भूभृते

(3) भूभृत्सु    (4) भूभृतः

22. 'धेनु' शब्दस्य षष्ठी एकवचनरूपमस्ति –

(1) धेनुम्    (2) धेनुभ्यः

(3) धेन्वा    (4) धेनोः

23. "आत्मने" इति रूपमस्ति –

(1) तृतीया – एकवचनम्

(2) चतुर्थी – एकवचनम्

(3) द्वितीया – एकवचनम्

(4) पञ्चमी – एकवचनम्

24. 'युष्मद्' शब्दस्य षष्ठी एकवचनरूपमस्ति –

(1) तव    (2) युष्मदः

(3) त्वत्    (4) त्वाम्

25. 'इदम्' इति स्त्रीलिङ्गे चतुर्थी – एकवचनरूपमस्ति –

(1) अनया (2) अस्याः

(3) अस्याम् (4) अस्यै

26. 'वारि' शब्दस्य द्वितीया – बहुवचनरूपं स्यात्

(1) वारिणी (2) वारीणि

(3) वारिणः (4) वारिण्

27. 'भू धातोः' लोटि उत्तमपुरुष – द्विवचनरुपमस्ति –

(1) भवावः (2) भवतम्

(3) भवेम (4) भवाव

28. 'पच्' धातोः लृटि प्रथमपुरुष–बहुवचने रूपमस्ति –

(1) पक्ष्यन्ति (2) पचिष्यन्ति

(3) पक्शन्ति (4) पच्स्यन्ति

29. 'दृश्' धातोः लृटि उत्तमपुरुष–बहुवचनरूपमस्ति –

(1) दृक्षामः (2) दृक्ष्मः

(3) द्रक्ष्यामः (4) पश्यामः

30. "पिबामः" इति तिङन्ते मूलधातुरस्ति –

(1) पिब् (2) पच्

(3) पा (4) प्रच्छ्

31. 'नी धातोः' लटि मध्यमपुरुष – द्विवचनरूपमस्ति –

(1) नयथः (2) नीयथः

(3) नयेथः (4) नयथ

32. 'सेव्' धातोः लङि मध्यमपुरुष–एकवचनरूपम् –

(1) असेवसे (2) असेवथाः

(3) असेवत् (4) असेवे

33. 'घ्नन्ति' इति तिङन्तरूपे मूलधातुरस्ति –

(1) घन् (2) अघ्न्

(3) अघानि (4) हन्

34. 'यच्छन्ति" इति तिङन्तरूपे मूलधातुरस्ति –

(1) यच्छ्त् (2) दाण्

(3) यच्छि (4) दी

35. 'कथ्' धातोः लोटि मध्यमपुरुष – द्विवचनमस्ति –

(1) कथतः (2) कथयताम्

(3) कथयतम् (4) कथयथः

36. "स्वरादिनिपातं ..." किम् ?

(1) उपसर्गाः (2) अव्ययम्

(3) प्रत्ययः (4) विसर्गः

37. "गच्छतु भवान् ______ दर्शनाय" इत्यत्र उचितेन अव्ययेन रिक्तस्थानपूरणं कुरुत –

(1) नीत्वा (2) विना

(3) तूष्णीम् (4) पुनः

38. "मार्गे पदानि खलु विषमी भवन्ति" इत्यत्र 'खलु' इत्यव्ययस्य किमर्थम् ?

(1) निश्चयेन (2) सुखेन

(3) दुर्गमनेन (4) त्वरितेन

39. "मुहूर्तमपि ज्वलनं श्रेयो न च धूमायितुम् _______" इति रिक्तस्थानपूरणं कुरुत –

(1) सहसा (2) चिरम्

(3) खलु (4) अद्य

40. उपसर्गाणां संख्याऽस्ति –

(1) 18 (2) 19

(3) 23 (4) 22

41. सैनिकः पलायते । रेखाङ्कितपदे कः उपसर्गः ?

(1) परा (2) अप्

(3) प्र (4) प्रति

42. "सीता रामम् अनुगच्छति" इत्यत्र 'अनु' उपसर्गः कस्मिन्नर्थे प्रयुक्तः ?

(1) अग्रे (2) सह

(3) समम् (4) पश्चात्

43. "प्रतिकूलतामुपगते हि विधौ ..." इत्यत्र 'प्रति' उपसर्गस्यार्थोऽस्ति –

(1) विरुद्धम् (2) अनुकूलम्

(3) साहाय्यम् (4) अनन्तरम्

44. शुद्धं वाक्यं चिनुत –

(1) मया पुस्तकं पठितम् ।

(2) मया पुस्तकं पठितवती ।

(3) मया पुस्तकं पठिता ।

(4) मया पुस्तकम् अपठम् ।

45. शुद्धं वाक्यमस्ति –

(1) तं बालकं दुग्धं यच्छ ।

(2) तेन बालकेन दुग्धं यच्छ ।

(3) तं बालकाय दुग्धं यच्छ ।

(4) तस्मै बालकाय दुग्धं यच्छ ।

46. "दम्पती पुत्रम् अभाषत्" इति वाक्यं शुद्धं कुरुत –

(1) अभाषेथाम् (2) अभाषति

(3) अभाषेताम् (4) अभाषावः

47. द्वितीया स्यात् –

(1) उभयतः योगे (2) परितः योगे

(3) समया योगे (4) सर्वेषां योगे

48. "मुझे लेख लिखना चाहिए" इति संस्कृतानुवादोऽस्ति –

(1) अहं लेखं लिखामि ।

(2) मया लेखं लिखनीयः ।

(3) मया लेखः लेखनीयः ।

(4) मया लेखं लिखितम् ।

49. "अध्यास्ते हरिः _____ " रिक्तस्थानपूर्तिं कुरुत –

(1) वैकुण्ठे (2) वैकुण्ठाय

(3) वैकुण्ठेन (4) वैकुण्ठम्

50. "गोषु _______ गतः" उचितपदेन रिक्तस्थानपूर्तिं कुरुत –

(1) दुह्यमानम् (2) दुह्यमानासु

(3) दुह्यमानानाम् (4) दुह्यवन्तः

51. शुद्धं वाक्यम् अस्ति –

(1) कोऽन्यो हुतवहेन दग्धुं प्रभावितः ।

(2) कोऽन्यो हुतवहाद् दग्धुं प्रभवति ।

(3) कोऽन्योः हुतवहाद् दग्धुं प्रभावन्ति ।

(4) कोऽन्यो हुतवहाद् दग्धुं प्रभविताम् ।

52. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

(a) द्वाविंशतिसर्गात्मकम् (i) शिशुपालवधम्

(b) विंशतिसर्गात्मकम् (ii) रघुवंशम्

(c) एकोनविंशतिसर्गात्मकम् (iii) किरातार्जुनीयम्

(d) अष्टादशसर्गात्मकम् (iv) नैषधमहाकाव्यम्

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (iii) | (i) | (iv) | (ii) |
| (2) | (ii) | (iii) | (i) | (iv) |
| (3) | (i) | (iv) | (iii) | (ii) |
| (4) | (iv) | (i) | (ii) | (iii) |

53. रामायणं कस्मिन् छन्दसि निबद्धम् ?

(1) अनुष्टुप् (2) शिखरिणी

(3) इन्द्रवज्रा (4) उपेन्द्रवज्रा

54. "क्व सूर्यप्रभवोवंशः क्व चाल्पविषयामतिः" इति कस्मिन् ग्रन्थे उक्तम् ?

(1) रामायणे (2) रघुवंशे

(3) शिशुपालवधे (4) महाभारते

55. 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इत्युक्तिः कस्मिन् महाकाव्ये उक्ता ?

(1) रघुवंशे (2) वाल्मीकि रामायणे

(3) महाभारते (4) किरातार्जुनीये

56. राजस्थानस्य कस्य कवेः रचना बृहत्त्रय्यां परिगणिता ?

(1) माघस्य (2) श्रीहर्षस्य

(3) भारवेः (4) कालिदासस्य

57. 'अभिनव बाणः" कोऽस्ति –

(1) सुबन्धुः

(2) दण्डी

(3) देवर्षि कलानाथशास्त्री

(4) अम्बिकादत्तव्यासः

58. 'सौन्दरनन्दं' कस्य रचना वर्तते ?

(1) अश्वघोषस्य (2) कालिदासस्य

(3) जयदेवस्य (4) भासस्य

59. "व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः"

इति सूक्तिः केन कविना उक्ता ?

(1) वाल्मीकिना (2) कालिदासेन

(3) भारविणा (4) माघेन

60. "भवितव्यतानां द्वाराणि भवन्ति सर्वत्र" इति सूक्तिः कस्मिन् नाटके अस्ति ?

(1) अभिज्ञानशाकुन्तले (2) उत्तररामचरिते

(3) मुद्राराक्षसे (4) मृच्छकटिके

61. अधोक्तेषु काव्येषु कतमम् काव्यं बृहत्त्रय्याम् न परिगणितम् –

(1) रघुवंशम् (2) किरातार्जुनीयम्

(3) शिशुपालवधम् (4) नैषधचरितम्

62. अधोक्तेषु बाणभट्टेन विरचितं काव्यमस्ति –

(1) दशकुमारचरितम् (2) महावीरचरितम्

(3) हर्षचरितम् (4) उत्तररामचरितम्

63. "वासवदत्ता" इति रचना कस्य कवेरस्ति ?

(1) सुबन्धोः (2) बाणस्य

(3) भासस्य (4) दण्डिनः

64. "साहित्य-संगीत-कलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः" इत्युक्तिः केनोक्ता ?

(1) श्रीहर्षेण (2) विदुरेण

(3) भर्तृहरिणा (4) माघेन

65. "पञ्चतन्त्रम्" इति रचना कस्य अस्ति ?

(1) नारायणपण्डितस्य (2) विष्णुशर्मणः

(3) विशाखदत्तस्य (4) शुकस्य

66. "अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्" इति उक्तिः केन काव्येन सम्बद्धाऽस्ति ?

(1) मुद्राराक्षसेन (2) मृच्छकटिकेन

(3) उत्तररामचरितेन (4) मालविकामित्रेण

67. "लेनिनामृतम्" नाम महाकाव्यं केन लिखितम् ?

(1) पं. पद्मशस्त्रिणा (2) भट्टमथुरानाथेन

(3) डॉ. प्रभाकरेण (4) डॉ. शिवदत्तेन

68. "प्रातिपदिकार्थ – लिङ्ग – परिमाण – वचनमात्रे ______" रिक्तस्थान-पूरणं करणीयम् –

(1) चतुर्थी (2) तृतीया

(3) द्वितीया (4) प्रथमा

69. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

| | | | |
|---|---|---|---|
| (a) | "अभितः परितः समया..." | (i) | तृतीया |
| (b) | येनाङ्गविकारः | (ii) | चतुर्थी |
| (c) | रुच्यर्थानां प्रीयमाणः | (iii) | पञ्चमी |
| (d) | भीत्रार्थानां भयहेतुः | (iv) | द्वितीया |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (iii) | (i) | (iv) | (ii) |
| (2) | (ii) | (iii) | (i) | (iv) |
| (3) | (i) | (iv) | (iii) | (ii) |
| (4) | (iv) | (i) | (ii) | (iii) |

70. "इन्द्रः द्युलोकमधितिष्ठति" इत्यत्र द्वितीयाविधायकं सूत्रमस्ति –

(1) अधिशीङ्स्थासां कर्म

(2) उपान्वध्याङ्वसः

(3) शब्दायतेर्न

(4) अकथितं च

71. "________ अवचिनोति फलानि' इत्यत्र रिक्तस्थाने किम् ?

(1) वृक्षात् (2) वृक्षम्

(3) वृक्षेण (4) वृक्षस्य

72. "रामेण सह लक्ष्मणः वनं गतः" इत्यत्र तृतीयाविधायकं सूत्रमस्ति –

(1) इत्थम्भूतलक्षणे (2) सहयुक्तेऽप्रधाने

(3) सहयोगे च (4) अपवर्गे तृतीया

73. 'क्रोशेन अनुवाकोऽधीतः' इत्यत्र तृतीयाविधायकं सूत्रमस्ति –

(1) येनाङ्गविकारः

(2) अपवर्गे तृतीया

(3) कर्तृकरणयोस्तृतीया

(4) दिवः कर्म च

74. "कर्मणा यमभिप्रैति सः ________" रिक्तस्थाने किम् ?

(1) सम्बन्धः (2) अधिकरणम्

(3) अपादानम् (4) संप्रदानम्

75. "ध्रुवमपायेऽपादानम्" इत्यत्र अपायोऽस्ति –

(1) विश्लेषः (2) विशेषः

(3) विशिष्टः (4) विकसितः

76. "ब्रह्मणः प्रजाः प्रजायन्ते" इति पञ्चमीविधायकं सूत्रम् –

(1) भुवः प्रभवः (2) जनिकर्तुः प्रकृतिः

(3) ध्रुवमपायेऽपादानाम् (4) आख्यातोपयोगे

77. "वेदानां सामवेदोऽस्मि" इत्यत्र कस्य सूत्रस्य प्रवृत्तिरस्ति ?

(1) यस्य च भावेन भावलक्षणम् ।

(2) यतश्च निर्धारणम् ।

(3) अधिरीश्वरे ।

(4) यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।

78. "रसैरुद्रैश्छिन्ना यमनसभलागः ________" इति किम् छन्दः ?

(1) स्रग्धरा (2) मालिनी

(3) शिखरिणी (4) शालिनी

79. "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ ।।"
उपर्युक्तपद्ये कतमं छन्दः ?

(1) आर्या (2) अनुष्टुप्

(3) वंशस्थ (4) उपजाति

80. "भूत्वा चिराय चतुरन्त महीसपत्नी,
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धम्,
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ।।"
उपर्युक्तश्लोके छन्दः अस्ति –

(1) उपेन्द्रवज्रा (2) वसन्ततिलका

(3) रथोद्धता (4) वशंस्थ

81. "मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्" इत्यत्र छन्दः अस्ति –

(1) मन्दाक्रान्ता (2) शिखरिणी

(3) शार्दूलविक्रीडितम् (4) मालिनी

82. "शार्दूलविक्रीडितम्" इति छन्दसि यति–व्यवस्था कीदृशी भवति ?

(1) 4, 6, 8 (2) 12, 7

(3) 6, 11 (4) 4, 9

83. "चतुर्भिर्यकारैः" कस्य छन्दसः निर्मितिर्भवति ?

(1) भुजंगप्रयातम् (2) आर्या

(3) वसन्ततिलका (4) शिखरिणी

84. "न–भ–भ–र" इत्येतैः कस्य छन्दसः लक्षणं प्रतीयते ?

(1) द्रुतविलम्बितम् (2) इन्द्रवज्रा

(3) वसन्ततिलका (4) स्रग्धरा

85. लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन् ।
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रवलयन् ।।
उपर्युक्तपद्ये कः अलंकारः वर्तते ?

(1) यमकम् (2) अनुप्रासः

(3) अन्वयः (4) व्यतिरेकः

86. "पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ।।
पद्येऽस्मिन् अलंकारः वर्तते –

(1) यमकः (2) श्लेषः

(3) उपमा (4) रूपकम्

87. "सामान्यं वा विशेषो वा तदन्येन समर्थ्यते" इति लक्षणं कस्य अलंकारस्य ?

(1) स्वभावोक्तिः (2) अर्थान्तरन्यासस्यः

(3) दीपकम् (4) तुल्ययोगिता

88. "प्रस्फुटं सुन्दरं साम्यं ... "

इत्येतैः विशेषणैः कस्यालंकारस्य लक्षणं ज्ञायते ?

(1) उपमा (2) रूपकम्

(3) उत्प्रेक्षा (4) व्यतिरेकः

89. "क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।"

श्लोकेऽस्मिन् कस्यालंकारस्य छविः दृश्यते –

(1) निदर्शना (2) दृष्टान्तः

(3) दीपकः (4) तुल्ययोगिता

90. "साम्यादतस्मिंस्तद्बुद्धिः ______ प्रतिभोत्थितः"

इति अलंकारनाम्ना रिक्तस्थानपूर्तिं कुरुत –

(1) सन्देहः (2) उत्प्रेक्षा

(3) भ्रान्तिमान् (4) यमकम्

91. "दिशि मन्दायते तेजो दक्षिणस्यां खेरपि ।

तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ।।

उदाहरणमिदं कस्यालंकारस्य अस्ति ?

(1) अतिशयोक्तेः (2) व्यतिरेकस्य

(3) उत्प्रेक्षायाः (4) उपमायाः

92. वज्रबाहुः – सुशिप्रः – सोमपः इत्यादिभिर्विशेषणैः कः देवः स्तूयते ?

(1) अग्निः (2) सवितृ

(3) इन्द्रः (4) विष्णुः

93. सहस्रशीर्षा ______ सहस्राक्षः सहस्रपात् ।

स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।।

इत्यस्याः ऋचायाः रिक्तस्थानपूरणं कुरुत –

(1) इन्द्रः (2) पुरुषः

(3) विष्णुः (4) वरुणः

94. इन्द्रसूक्तस्य द्रष्टा ऋषि रस्ति –

(1) गृत्समद् (2) कक्षीवान्

(3) कण्वः (4) मधुच्छन्दा

95. "उरुक्रमः – उरुगायः – विक्रमः – उरुक्रमः"

इत्यादिभिः विशेषणैः कः देवः स्तुतः ?

(1) अग्निः (2) विष्णुः

(3) वरुणः (4) रुद्रः

96. "........ पूर्वेभिर्ऋषिभिर् ईड्यो नूतनैरुत ।

स देवां एह वक्षति" इति रूपेण कः देवः स्तुतः ?

(1) अग्निः (2) इन्द्रः

(3) वरुणः (4) विष्णुः

97. "नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः ।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।।"

अत्र श्रीमद्भगवद्गीतायां श्रीकृष्णेन "एनम्" इति पदेन किमुक्तम् ?

(1) शरीरम् /देहम्

(2) आत्मानम्/अव्ययम्

(3) बान्धवान्

(4) मित्रम्

98. “_______ समे कृत्वा लाभालाभौ जयाजयौ ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।

श्रीमद्भगवद्गीतायाः श्लोकेऽस्मिन् रिक्तस्थानपूरणं कुरुत –

(1) मित्रामित्रे (2) कृताकृतौ

(3) सुखदुःखे (4) वीतावीते

99. श्रीमद्भगवद्गीतानुसारेण या निशा सर्वभूतानां भवति तस्यां कः जागर्ति ?

(1) संयमी (2) अपण्डितः

(3) प्रज्ञावान् (4) स्थितप्रज्ञः

100. महाभारतयुद्धक्षेत्रे स्वजनान् संदृश्य विषादयुक्तः कः जातः ?

(1) युधिष्ठिरः (2) अर्जुनः

(3) द्रोणाचार्यः (4) भीष्मः

101. ‘ईशोपनिषद्’ यजुर्वेदस्य कतमो अध्यायोऽस्ति ?

(1) विशतितमः (2) अष्टाविंशतितमः

(3) चत्वारिंशत्तमः (4) पञ्चाशत्तमः

102. “ईशावास्यमिदं सर्वं _______ जगत्यां जगत् ” इति रिक्तस्थानपूर्तिं कुरुत –

(1) यत्किमपि (2) यत्किञ्च

(3) यत्कस्यापि (4) येनकेनापि

103. ईशोपनिषदानुसारेण के जनाः अन्धं तमः प्रविशन्ति ?

(1) येऽसम्भूतिमुपासते (2) ये विद्यामुसासते

(3) ये धर्ममुपासते (4) ये सर्वमुपासते

104. वर्णव्यवस्थायां क्षत्रियाणाम् उत्पत्तिः ब्रह्मणः कस्माद् अंगात् जाता ?

(1) मुखात् (2) बाहोः

(3) पद्भ्याम् (4) उरुभागात्

105. अतिथिपूजनं कस्मिन् यज्ञे क्रियते ?

(1) ब्रह्मयज्ञे (2) सामयज्ञे

(3) पितृयज्ञे (4) नृयज्ञे

106. भारतीयमनीषिभिः मनुष्यस्य सम्पूर्णजीवनकालं कतिषु सोपानेषु विभक्तम् ?

(1) एकस्मिन् (2) द्वयोः

(3) त्रिषु (4) चतुर्षु

107. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

| | | | |
|---|---|---|---|
| (a) | वर्णाः | (i) | षोड़श |
| (b) | आश्रमाः | (ii) | चत्वारः |
| (c) | संस्काराः | (iii) | पञ्च |
| (d) | महायज्ञाः | (iv) | चत्वारः |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (i) | (iii) | (ii) | (iv) |
| (2) | (iv) | (ii) | (i) | (iii) |
| (3) | (i) | (ii) | (iii) | (iv) |
| (4) | (iv) | (i) | (ii) | (iii) |

108. संस्कृतशिक्षणस्य उद्देश्यमस्ति -

(1) अवबोधात्मकम्  (2) ज्ञानात्मकम्

(3) सृजनात्मकम्  (4) उपर्युक्तं सर्वम्

109. संस्कृतशिक्षणोपयोगी सिद्धान्तोऽस्ति -

(1) स्वभाविकतायाः सिद्धान्तः

(2) क्रियाशीलतायाः सिद्धान्तः

(3) रुचेः सिद्धान्तः

(4) उपर्युक्ताः सर्वे

110. का नाम शिक्षा ?

(1) शिक्षा – ज्ञानम् अनुभवश्च

(2) शिक्षा – एकं पुस्तकम्

(3) शिक्षा – एकं वस्तु

(4) शिक्षा – एकं खेलम्

111. शिक्षणस्य मुख्यं उद्देश्यं किमस्ति ?

(1) व्यक्त्यै धनदानम्

(2) आजीविकोपार्जनम्

(3) व्यक्तेः सर्वाङ्गीणविकासः

(4) अध्यापक निर्माणम्

112. संस्कृतभाषाशिक्षणस्य उत्तमविधिरस्ति -

(1) अनुवादविधिः  (2) लेखनविधिः

(3) परोक्षविधिः  (4) प्रत्यक्षविधिः

113. काव्यशिक्षणस्य प्रमुखोद्देश्यं भवति -

(1) काव्य – रचनाकौशल विकासः

(2) व्यवहार – चातुर्य विकासः

(3) शब्दभण्डारस्य अभिवृद्धिः

(4) चतुर्वर्ग फलप्राप्तिः उपर्युक्तम् सर्वम् च

114. मानवस्य प्रथमं शिक्षाप्रतिष्ठानम् -

(1) प्राथमिक विद्यालयः

(2) परिवारः

(3) माध्यमिक विद्यालयः

(4) महाविद्यालयः

115. गद्यपाठेषु काठिन्यनिवारणाय अधोलिखित – विधयः सन्ति -

(1) दन्तकथा-प्रविधिः (2) व्याख्या-प्रविधिः

(3) अनुवाद-प्रविधिः  (4) एते सर्वे प्रविधयः

116. व्याकरण-शिक्षणस्य सर्वोत्तमः कः विधिः

(1) आगमन-निगमन विधिः

(2) सूत्र-व्याख्या विधिः

(3) नियमन-विनियमन विधिः

(4) शिक्षण विधिः

117. कक्षाकक्षे प्रथमाऽनिवार्यता विद्यते -

(1) पाठ्यपुस्तकस्य  (2) श्याम पट्टस्य

(3) मानचित्रस्य  (4) दूरदर्शनस्य

118. केन कौशलमाध्यमेन अध्यापकः विषयवस्तुस्पष्टीकरणस्य प्रयासं करोति ?

(1) प्रवाहकौशलेन (2) भाषणकौशलेन

(3) प्रश्नोत्तरकौशलेन (4) श्रवणकौशलेन

119. छात्राणां पूर्वज्ञानेन सह नूतनज्ञानं योजयति –

(1) पाठयोजना (2) दर्शनम्

(3) लेखनम् (4) श्रवणम्

120. साहित्यस्य अवबोधनं, पठनम् आत्मसात्करणं कर्तुं शक्यते ?

(1) कक्षाकार्येण (2) मौनवाचनेन

(3) सस्वरवाचनेन (4) द्रुतवाचनेन

121. संस्कृतभाषाधिगस्य स्वाभाविकः मनोवैज्ञानिकश्च क्रमः विधते ?

(1) पठनम्, भाषाणम्, श्रवणम्, लेखनम्

(2) श्रवणम्, भाषणम्, लेखनम्, पठनम्

(3) पठनम्, श्रवणम्, लेखनम्, भाषणम्

(4) भाषणम्, लेखनम्, श्रवणम्, पठनम्

122. "दण्डान्वयः-खण्डान्वयः-टीका-समीक्षा" इत्येताः विधयः केन सम्बद्धाः सन्ति ?

(1) व्याकरणशिक्षणेन (2) नाट्यशिक्षणेन

(3) काव्यशिक्षणेन (4) निबन्धशिक्षणेन

123. नाटकशिक्षणे कतमोविधिः सर्वोत्तमः कथितः –

(1) आदर्शनाट्यविधिः (2) व्याख्याविधिः

(3) रंगमंचाभिनयविधिः (4) समवायविधिः

124. हरबार्टपञ्चपदी कुत्र प्रयुज्यते ?

(1) पाठयोजनायाम् (2) सम्भाषणे

(3) लेखने (4) पठने

125. संस्कृतभाषायां "कण्ठस्थीकरणं" कस्मिन् शिक्षणे आवश्यकम् ?

(1) व्याकरणशिक्षणे (2) गद्यशिक्षणे

(3) कथाशिक्षणे (4) नृत्यशिक्षणे

126. व्याकरणशिक्षणे उदाहरणात् नियमनिर्धारणं कस्मिन् विधौ भवति ?

(1) सूत्रविधौ (2) सहयोगविधौ

(3) आगमनविधौ (4) परम्परागतविधौ

127. शिक्षकदिवसः कस्य महापुरुषस्य जन्मदिवसे आयोज्यते ?

(1) स्वामी विवेकानन्दस्य

(2) डॉ. सर्वपल्ली राधाकृष्णनस्य

(3) रवीन्द्रनाथ टैगोरस्य

(4) डॉ. भीम्रावस्य अम्बेडकरस्य

128. "हलन्त्यम्" इति सूत्रेण संज्ञा भवति –

(1) आगम –  (2) आदेश –

(3) इत् –  (4) भाव –

129. "परः सन्निकर्षः _______" इति रिक्तस्थान – पूरणं कुरुत –

(1) संयोगः  (2) संहिता

(3) लोपः  (4) इत्

130. "उच्चैः" इति का संज्ञा वर्तते ?

(1) उच्चारणम्  (2) उदात्तः

(3) नदी  (4) घि

131. "अकुहविसर्जनीयानां _____________" इत्येषामुच्चारणस्थानमस्ति –

(1) ओष्ठः  (2) स्पर्शः

(3) संवारः  (4) कण्ठः

132. "व"कारस्योच्चारणस्थानमस्ति –

(1) दन्तोष्ठम्  (2) कण्ठोष्ठम्

(3) कण्ठतालु  (4) नासिका

133. आभ्यन्तरप्रयत्नानि सन्ति –

(1) 3  (2) 6

(3) 5  (4) 7

134. "तुल्यास्यप्रयत्नम्" इति किम् ?

(1) प्लुतः  (2) सवर्णम्

(3) वर्णम्  (4) प्रत्ययः

135. सुबन्तस्य तिङन्तस्य च संज्ञा अस्ति –

(1) पद संज्ञा  (2) हल संज्ञा

(3) गुण संज्ञा  (4) योग संज्ञा

136. "पठत्वेकः" इत्यस्य शब्दस्य सन्धिविच्छेदः स्यात् –

(1) पठ + त्वेकः  (2) पठतु + एकः

(3) पठत् + वेकः  (4) पठत्व + एकः

137. "राज + ऋषिः" इत्यनयोः सन्धिपदं स्यात् –

(1) राजार्षिः  (2) राजर्षिः

(3) राजर्अर्षिः  (4) राज्रर्षिः

138. "प्र + एजते" = प्रेजते इति सन्धिविधायकं सूत्रमस्ति –

(1) एङि पररूपम्  (2) एङः पदान्तादति

(3) एङः  (4) ओमाङोश्च

139. "श्री + ईशः" = श्रीशः इत्यत्र सन्धिरस्ति –

(1) गुणः  (2) दीर्घः

(3) वृद्धिः  (4) पररूपम्

140. "ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रस्योदाहरणमस्ति –

(1) विष्णूदयः  (2) सैषा

(3) प्राच्छ्र्छति  (4) हरी एतौ

141. "सच्चित्" इति सन्धिपदविधायकं सूत्रमस्ति –

(1) ष्टुना ष्टुः (2) स्तोः श्चुना श्चुः

(3) शात् (4) शश्छोऽटि

142. "झलां जशोऽन्ते" इति सूत्रेण सिद्धं शुद्धोदाहरणम् अस्ति –

(1) जगदीशः (2) बुद्धिः

(3) सन्मतिः (4) एतन्मुरारिः

143. "शान्तः" इत्यत्र अनुस्वारस्य नकारं केन सूत्रेण विधीयते –

(1) मोऽनुस्वारः

(2) अनुस्वारस्य ययि परसवर्णः

(3) तोर्लि

(4) वा पदान्तस्य

144. "तोर्लिः" इति सूत्रेण तवर्गस्य लकारे परे सति तवर्गमपि किं स्यात् –

(1) लकारम् (2) तकारम्

(3) वकारम् (4) तलोपम्

145. "वाग्घरिः" इति पदस्य सन्धिविच्छेदं स्यात् –

(1) वाघ् + घरिः (2) वा + हरिः

(3) वाक् + हरिः (4) वा + ग्घरिः

146. "खरवसानयोः ________" इति सूत्रस्य रिक्तस्थानं पूरणीयम् –

(1) रुः (2) विसर्जनीयः

(3) विसर्गः (4) शरः

147. "कः + अपि= कोऽपि" इति ओत्वविधायकं सूत्रमस्ति –

(1) हशि च

(2) अतो रोरप्लुतादप्लुते

(3) वा शरि

(4) सोऽचि

148. "पुनर् + रमते = पुनारमते" इति कृते प्रमुखं सूत्रम् –

(1) ढ्रलोपे पूर्वस्य दीर्घोऽणः

(2) वा शरि ।

(3) रोऽसुपि

(4) अकः सवर्णे दीर्घः

149. "वधूः + एषा" = इत्यत्र सन्धिपदम् अस्ति –

(1) वध्वेषा (2) वधूरेषा

(3) वधूषा (4) वध्वीषा

150. "हशि च" इति सूत्रस्य उचितोदाहरणम् –

(1) देवो गच्छति (2) देवर्गच्छति

(3) देवागच्छति (4) देवैः गच्छति

रफ कार्य के लिए स्थान